# લક્ષ્મણસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

lakShmaNasahasranAmastotram from bhuShuNDirAmAya

sanskritdocuments.org

June 2, 2019

# lakShmaNasahasranAmastotram from bhuShuNDirAmAya

# લક્ષ્મણસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

## Sanskrit Document Information

Text title : lakShmaNasahasranAmastotram from bhushuNDIrAmAyaNa

File name : lakShmaNasahasranAmastotrambhushuNDIrAmAyaNa.itx

Category : raama, sahasranAma

Location : doc_raama

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Source : Bhushundi Ramayanam pUrvakhaNDa, adhyAYa 15

Latest update : February 25, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 2, 2019

*sanskritdocuments.org*

# લક્ષ્મણસહસ્રનામસ્તોત્રમ્ ભુષુણ્ડિરામાયણાન્તર્ગતમ્

પઞ્ચદશોઽધ્યાયઃ

વસિષ્ઠ ઉવાચ -

ઇદાનીં તવ પુત્રસ્ય દ્વિતીયસ્ય મહાત્મનઃ ।
નામસાહસ્રકં વક્ષ્યે સુગોપ્યં દૈવતૈરપિ ॥ ૧॥

એષ સાક્ષાદ્ધરેરંશો દેવદેવસ્ય શાર્ઙ્ગિણઃ । var દેવરામસ્ય
યઃ શેષ ઇતિ વિખ્યાતઃ સહસ્રવદનો વિભુઃ ॥ ૨॥

તસ્યૈતન્નામસાહસ્રં વક્ષ્યામિ પ્રયતઃ શૃણુ ।
લક્ષ્મણઃ શેષગઃ શેષઃ સહસ્રવદનોઽનલઃ ॥ ૩॥

સંકર્ષણઃ કાલરૂપઃ સહસ્રાર્ચિર્મહાનલઃ ।
કાલરૂપો દુરાધર્ષો બલભદ્રઃ પ્રલમ્બહા ॥ ૪॥

કૃતાન્તઃ કાલવદનો વિદ્યુજ્જિહ્વો વિભાવસુઃ ।
કાલાત્મા કલનાત્મા ચ કલાત્મા સકલોઽકલઃ ॥ ૫॥

કુમારબ્રહ્મચારી ચ રામભક્તઃ શુચિવ્રતઃ ।
નિરાહારો જિતાહારો જિતનિદ્રો જિતાસનઃ ॥ ૬॥

મહારુદ્રો મહાક્રોધો ઇન્દ્રજિત્પ્રાણનાશકઃ ।
સીતાહિતપ્રદાતા ચ રામસૌખ્યપ્રદાયકઃ ॥ ૭॥

યતિવેશો વીતભયઃ સુકેશઃ કેશવઃ કૃશઃ ।
કૃષ્ણાંશો વિમલાચારઃ સદાચારઃ સદાવ્રતઃ ॥ ૮॥ var કૃશાંશો

બર્હાવતંસો વિરતિર્ગુઞ્જાભૂષણભૂષિતઃ ।
શેષાચલનિવાસો ચ શેષાદ્રિઃ શેષરૂપધૃક્ ॥ ૯॥

અધોહસ્તઃ પ્રશાન્તાત્મા સાધૂનાં ગતિદર્શનઃ ।
સુદર્શનઃ સુરૂપાઙ્ગો યજ્ઞદોષનિવર્તનઃ ॥ ૧૦॥

અનન્તો વાસુકિર્નાગો મહીભારો મહીધરઃ ।  var  વાસુકીનાગો
કૃતાન્તઃ શમનત્રાતા ધનુર્જ્યાકર્ષણોદ્ભટઃ ॥ ૧૧॥

મહાબલો મહાવીરો મહાકર્મા મહાજવઃ ।
જટિલસ્તાપસઃ પ્રહ્વઃ સત્યસન્ધઃ સદાત્મકઃ ॥ ૧૨॥

શુભકર્મા ચ વિજયી નરો નારાયણાશ્રયઃ ।
વનચારી વનાધારો વાયુભક્ષો મહાતપાઃ ॥ ૧૩॥

સુમન્ત્રો મન્ત્રતત્ત્વજ્ઞઃ કોવિદો રામમન્ત્રદઃ ।
સૌમિત્રેયઃ પ્રસન્નાત્મા રામાનુવ્રત ઈશ્વરઃ ॥ ૧૪॥

રામાતપત્રભૃદ્ ગૌરઃ સુમુખઃ સુખવર્દ્ધનઃ ।
રામકેલિવિનોદી ચ રામાનુગ્રહભાજનઃ ॥ ૧૫॥

દાન્તાત્મા દમનો દમ્યો દાસો દાન્તો દયાનિધિઃ ।
આદિકાલો મહાકાલઃ ક્રૂરાત્મા ક્રૂરનિગ્રહઃ ॥ ૧૬॥

વનલીલાવિનોદજ્ઞો વિછેત્તા વિરહાપહઃ ।
ભસ્માઙ્ગરાગધવલો યતી કલ્યાણમન્દિરઃ ॥ ૧૭॥

અમન્દો મદનોન્માદી મહાયોગી મહાસનઃ ।
ખેચરીસિદ્ધિદાતા ચ યોગવિદ્યોગપારગઃ ॥ ૧૮॥

વિષાનલો વિષહ્યશ્ચ કોટિબ્રહ્માણ્ડદાહકૃત્ ।  var  વિષયશ્ચ
અયોધ્યાજનસંગીતો રામૈકાનુચરઃ સુધીઃ ॥ ૧૯॥

રામાજ્ઞાપાલકો રામો રામભદ્રઃ પુનીતપાત્ ।
અક્ષરાત્મા ભુવનકૃદ્ વિષ્ણુતુલ્યઃ ફણાધરઃ ॥ ૨૦॥

પ્રતાપી દ્વિસહસ્રાક્ષો જ્વલદ્રૂપો વિભાકરઃ ।
દિવ્યો દાશરથિર્બાલો બાલાનાં પ્રીતિવર્દ્ધનઃ ॥ ૨૧॥

વાણપ્રહરણો યોદ્ધા યુદ્ધકર્મવિશારદઃ ।
નિષઙ્ગી કવચી દૃપ્તો દૃઢવર્મા દૃઢવ્રતઃ ॥ ૨૨॥

દૃઢપ્રતિજ્ઞઃ પ્રણયી જાગરૂકો દિવાપ્રિયઃ ।
તામસી તપનસ્તાપી ગુડાકેશો ધનુર્દ્ધરઃ ॥ ૨૩॥

શિલાકોટિપ્રહરણો નાગપાશવિમોચકઃ ।
ત્રૈલોક્યહિંસકર્ત્તા ચ કામરૂપઃ કિશોરકઃ ॥ ૨૪॥

કૈવર્તકુલવિસ્તારઃ કૃતપ્રીતિઃ કૃતાર્થનઃ । var કુલનિસ્તારઃ
કૌપીનધારી કુશલઃ શ્રદ્ધાવાન્ વેદવિત્તમઃ ॥ ૨૫॥

વ્રજેશ્વરોમહાસખ્યઃ કુઞ્જાલયમહાસખઃ ।
ભરતસ્યાગ્રણીર્નેતા સેવામુખ્યો મહામહઃ ॥ ૨૬॥

મતિમાન્ પ્રીતિમાન્ દક્ષો લક્ષ્મણો લક્ષ્મણાન્વિતઃ ।
હનુમત્પ્રિયમિત્રશ્ચ સુમિત્રાસુખવર્દ્ધનઃ ॥ ૨૭॥

રામરૂપો રામમુખો રામશ્યામો રમાપ્રિયઃ ।
રમારમણસંકેતી લક્ષ્મીવાઁલ્લક્ષ્મણાભિધઃ ॥ ૨૮॥

જાનકીવલ્લભો વર્યઃ સહાયઃ શરણપ્રદઃ ।
વનવાસપ્રકથનો દક્ષિણાપથવીતભીઃ ॥ ૨૯॥

વિનીતો વિનયી વિષ્ણુવૈષ્ણવો વીતભીઃ પુમાન્ ।
પુરાણપુરુષો જૈત્રો મહાપુરુષલક્ષ્મણઃ ॥ ૩૦॥ var લક્ષણઃ

મહાકારુણિકો વર્મી રાક્ષસૌઘવિનાશનઃ ।
આર્તિહા બ્રહ્મચર્યસ્થઃ પરપીડાનિવર્ત્તનઃ ॥ ૩૧॥

પરાશયજ્ઞઃ સુતપાઃ સુવીર્યઃ સુભગાકૃતિઃ ।
વન્યભૂષણનિર્માતા સીતાસન્તોષવર્દ્ધનઃ ॥ ૩૨॥

રાઘવેન્દ્રો રામરતિર્ગુપ્ત સર્વપરાક્રમઃ । var રતિર્યુક્ત
દુર્દ્ધર્ષણો દુર્વિષહઃ પ્રણેતા વિધિવત્તમઃ ॥ ૩૩॥

ત્રયીમયોઽગ્નિમયઃ ત્રેતાયુગવિલાસકૃત્ ।
દીર્ઘદંષ્ટ્રો મહાદંષ્ટ્રો વિશાલાક્ષો વિષોલ્વણઃ ॥ ૩૪॥

સહસ્રજિહ્વાલલનઃ સુધાપાનપરાયણઃ ।
ગોદાસરિત્તરઙ્ગાર્ચ્યો નર્મદાતીર્થપાવનઃ ॥ ૩૫॥

શ્રીરામચરણસેવી સીતારામસુખપ્રદઃ ।
રામભ્રાતા રામસમો માર્ત્તણ્ડકુલમણ્ડિતઃ ॥ ૩૬॥

ગુપ્તગાત્રો ગિરાચાર્યો મૌનવ્રતધરઃ શુચિઃ ।
શૌચાચારૈકનિલયો વિશ્વગોપ્તા વિરાડ્ વસુઃ ॥ ૩૭॥

ક્રુદ્ધઃ સન્નિહિતો હન્તા રામાર્ચાપરિપાલકઃ ।

જનકપ્રેમજામાતા સર્વાધિકગુણાકૃતિઃ ॥ ૩૮॥

સુગ્રીવરાજ્યકાઙ્ક્ષી ચ સુખરૂપી સુખપ્રદઃ ।
આકાશગામી શક્તીશોઽનન્તશક્તિપ્રદેર્શનઃ ॥ ૩૯॥ var શક્તિષ્ટો

દ્રોણાદ્રિમુક્તિદોઽચિન્ત્યઃ સોપકારજનપ્રિયઃ ।
કૃતોપકારઃ સુકૃતી સુસારઃ સારવિગ્રહઃ ॥ ૪૦॥

સુવંશો વંશહસ્તશ્ચ દણ્ડી ચાજિનમેખલી ।
કુણ્ડો કુન્તલભૃત્ કાણ્ડઃ પ્રકાણ્ડઃ પુરુષોત્તમઃ ॥ ૪૧॥

સુબાહુઃ સુમુખઃ સ્વઙ્ગઃ સુનેત્રઃ સમ્ભ્રમો ક્ષમી ।
વીતભીર્વીતસઙ્કલ્પો રામપ્રણયવારણઃ ॥ ૪૨॥

વદ્ધવર્મા મહેશ્વાસો વિરૂઢઃ સત્યવાક્તમઃ ।
સમર્પણી વિધેયાત્મા વિનેતાત્મા ક્રતુપ્રિયઃ ॥ ૪૩॥

અજિની બ્રહ્મપાત્રી ચ કમણ્ડલુકરો વિધિઃ ।
નાનાકલ્પલતાકલ્પો નાનાફલવિભૂષણઃ ॥ ૪૪॥

કાકપક્ષપરિક્ષેપી ચન્દ્રવક્ત્રઃ સ્મિતાનનઃ ।
સુવર્ણવેત્રહસ્તશ્ચ અજિહ્મો જિહ્મગાપહઃ ॥ ૪૫॥

કલ્પાન્તવારિધિસ્થાનો બીજરૂપો મહાઙ્કુરઃ ।
રેવતીરમણો દક્ષો વાભ્રવી પ્રાણવલ્લભઃ ॥ ૪૬॥

કામપાલઃ સુગૌરાઙ્ગો હલભૃત્ પરમોલ્વણઃ ।
કૃત્સ્નદુઃખપ્રશમનો વિરઞ્જિપ્રિયદર્શનઃ ॥ ૪૭॥

દર્શનીયો મહાદર્શો જાનકીપરિહાસદઃ ।
જાનકોનર્મસચિવો રામચારિત્રવર્દ્ધનઃ ॥ ૪૮॥

લક્ષ્મીસહોદરોદારો દારુણઃ પ્રભુરૂર્જિતઃ ।
ઊર્જસ્વલો મહાકાયઃ કમ્પનો દણ્ડકાશ્રયઃ ॥ ૪૯॥

દ્વીપિચર્મપરીધાનો દુષ્ટકુઞ્જરનાશનઃ ।
પુરગ્રામમહારણ્યવટીદ્રુમવિહારવાન્ ॥ ૫૦॥

નિશાચરો ગુપ્તચરો દુષ્ટરાક્ષસમારણઃ ।
રાત્રિઞ્જરકુલચ્છેત્તા ધર્મમાર્ગપ્રવર્તકઃ ॥ ૫૧॥

શેષાવતારો ભગવાન્ છન્દોમૂર્તિર્મહોજ્જ્વલઃ ।
અહૃષ્ટો હૃષ્ટવેદાઙ્ગો ભાષ્યકારઃ પ્રભાષણઃ ॥ ૫૨ ॥

ભાષ્યો ભાષણકર્તા ચ ભાષણીયઃ સુભાષણઃ ।
શબ્દશાસ્ત્રમયો દેવઃ શબ્દશાસ્ત્રપ્રવર્ત્તકઃ ॥ ૫૩ ॥

શબ્દશાસ્ત્રાર્થવાદી ચ શબ્દજ્ઞઃ શબ્દસાગરઃ ।
શબ્દપારાયણજ્ઞાનઃ શબ્દપારાયણપ્રિયઃ ॥ ૫૪ ॥

પ્રાતિશાખ્યો પ્રહરણો ગુપ્તવેદાર્થસૂચકઃ ।
દૃપ્તવિત્તો દાશરથિઃ સ્વાધીનઃ કેલિસાગરઃ ॥ ૫૫ ॥

ગૈરિકાદિમહાધાતુમણ્ડિતશ્ચિત્રવિગ્રહઃ ।
ચિત્રકૂટાલયસ્થાયી માયી વિપુલવિગ્રહઃ ॥ ૫૬ ॥

જરાતિગો જરાહન્તા ઊર્ધ્વરેતા ઉદારધીઃ ।
માયૂરમિત્રો માયૂરો મનોજ્ઞઃ પ્રિયદર્શનઃ ॥ ૫૭ ॥

મથુરાપુરનિર્માતા કાવેરીતટવાસકૃત્ ।
કૃષ્ણાતીરાશ્રમસ્થાનો મુનિવેશો મુનીશ્વરઃ ॥ ૫૮ ॥

મુનિગમ્યો મુનીશાનો ભુવનત્રયભૂષણેઃ ।
આત્મધ્યાનકરો ધ્યાતા પ્રત્યક્સન્ધ્યાવિશારદઃ ॥ ૫૯ ॥

વાનપ્રસ્થાશ્રમાસેવ્યઃ સંહિતેષુ પ્રતાપધૃક ।
ઉષ્ણીષવાન્ કઞ્ચુકી ચ કટિબન્ધવિશારદઃ ॥ ૬૦ ॥

મુષ્ટિકપ્રાણદહનો દ્વિવિદપ્રાણશોષણઃ । var પ્રાનહનનો
ઉમાપતિરુમાનાથ ઉમાસેવનતત્પરઃ ॥ ૬૧ ॥

વાનરવ્રાતમધ્યસ્થો જામ્બુવદ્ગણસસ્તુતઃ ।
જામ્બુવદ્ભક્તસુખદો જામ્બુર્જામ્બુમતીસખઃ ॥ ૬૨ ॥

જામ્બુવદ્ભક્તિવશ્યશ્ચ જામ્બૂનદપરિષ્કૃતઃ ।
કોટિકલ્પસ્મૃતિવ્યગ્રો વરિષ્ઠો વરણીયભાઃ ॥ ૬૩ ॥

શ્રીરામચરણોત્સઙ્ગમધ્યલાલિતમસ્તકઃ ।
સીતાચરણસંસ્પર્શવિનીતાધ્વમહાશ્રમઃ ॥ ૬૪ ॥

સમુદ્રદ્વીપચારી ચ રામકૈઙ્કર્યસાધકઃ ।
કેશપ્રસાધનામર્ષી મહાવ્રતપરાયણઃ ॥ ૬૫ ॥

રજસ્વલોઽતિમલિનોઽવધૂતો ધૂતપાતકઃ ।
પૂતનામા પવિત્રાઙ્ગો ગઙ્ગાજલસુપાવનઃ ॥ ૬૬॥

હયશીર્ષમહામન્ત્રવિપશ્ચિન્મન્ત્રિકોત્તમઃ ।
વિષજ્વરનિહન્તા ચ કાલકૃત્યાવિનાશનઃ ॥ ૬૭॥

મદોદ્ધતો મહાયાનો કાલિન્દીપાતભેદનઃ ।
કાલિન્દીભયદાતા ચ ખટ્વાઙ્ગી મુખરોઽનલઃ ॥ ૬૮॥

તાલાઙ્કઃ કર્મવિખ્યાતિર્ધરિત્રીભરધારકઃ ।
મણિમાન્ કૃતિમાન્ દીપ્તો બદ્ધકક્ષો મહાતનુઃ ॥ ૬૯॥

ઉત્તુઙ્ગો ગિરિસંસ્થાનો રામમાહાત્મ્યવર્દ્ધનઃ ।
કીર્તિમાન્ શ્રુતિકીર્તિશ્ચ લઙ્કાવિજયમન્ત્રદઃ ॥ ૭૦॥

લઙ્કાધિનાથવિષહો વિભીષણગતિપ્રદઃ ।
મન્દોદરીકૃતાશ્ચર્યો રાક્ષસીશતઘાતકઃ ॥ ૭૧॥

કદલીવનનિર્માતા દક્ષિણાપથપાવનઃ ।
કૃતપ્રતિજ્ઞો બલવાન્ સુશ્રીઃ સન્તોષસાગરઃ ॥ ૭૨॥

કપર્દી રુદ્રદુર્દર્શો વિરૂપવદનાકૃતિઃ ।
રણોદ્ધુરો રણપ્રશ્રી રણઘણ્ટાવલમ્બનઃ ॥ ૭૩॥

ક્ષુદ્રઘણ્ટાનાદકટિઃ કઠિનાઙ્ગો વિકસ્વરઃ ।
વજસારઃ સારધરઃ શાર્ઙ્ગી વરુણસંસ્તુતઃ ॥ ૭૪॥

સમુદ્રલઙ્ઘનોદ્યોગી રામનામાનુભાવવિત્ ।
ધર્મજુષ્ટો ઘૃણિસ્પૃષ્ટો વર્મી વર્મભરાકુલઃ ॥ ૭૫॥

ધર્મયાજો ધર્મદક્ષો ધર્મપાઠવિધાનવિત્ ।
રત્નવસ્ત્રો રત્નધૌત્રો રત્નકૌપીનધારકઃ ॥ ૭૬॥

લક્ષ્મણો રામસર્વસ્વં રામપ્રણયવિહ્વલઃ ।
સબલોઽપિ સુદામાપિ સુસખા મધુમઙ્ગલઃ ॥ ૭૭॥

રામરાસવિનોદજ્ઞો રામરાસવિધાનવિત્ ।
રામરાસકૃતોત્સાહો રામરાસસહાયાન્ ॥ ૭૮॥

વસન્તોત્સવનિર્માતા શરત્કાલવિધાયકઃ ।

રામકેલીભરાનન્દી દૂરોત્સારિતકણ્ટકઃ ॥ ૭૯॥

ઇતીદં તવ પુત્રસ્ય દ્વિતીયસ્ય મહાત્મનઃ ।
યઃ પઠેન્નામસાહસ્રં સ યાતિ પરમં પદમ્ ॥ ૮૦॥

પીડાયાં વાપિ સઙ્ગ્રામે મહાભય ઉપસ્થિતે ।
યઃ પઠેન્નામસાહસ્રં લક્ષ્મણસ્ય મહૌ મેધય ।
સ સદ્યઃ શુભમાપ્નોતિ લક્ષ્મણસ્ય પ્રસાદતઃ ॥ ૮૧॥

સર્વાન્ દુર્ગાન્ તરત્યાશુ લક્ષ્મણેત્યેકનામતઃ ।
દ્વિતીયનામોજ્વારેણ દેવં વશયતિ ધ્રુવમ્ ॥ ૮૨॥

પઠિત્વા નામસાહસ્રં શતાવૃત્યા સમાહિતઃ ।
પ્રતિનામાહુતિં દત્વા કુમારાન્ ભોજયેદ્દશ ॥ ૮૩॥

સર્વાન્ કામાનવાપ્નોતિ રામાનુજકૃપાવશાત્ ।
લક્ષ્મણેતિ ત્રિવર્ગસ્ય મહિમા કેન વર્ણ્યતે ॥ ૮૪॥

યચ્છ્રુત્વા જાનકીજાનેર્હદિ મોદો વિવર્દ્ધતે ।
યથા રામસ્તથા લક્ષ્મીર્યથા શ્રીર્લક્ષ્મણસ્તથા ॥ ૮૫॥ var લક્ષ્મ્યા યથા

રામદ્વયોર્ન ભેદોઽસ્તિ રામલક્ષ્મણયોઃ ક્વચિત્ ।
એષ તે તનયઃ સાક્ષાદ્રામેણ સહ સઙ્ગતઃ ॥ ૮૬॥

હરિષ્યતિ ભુવો ભારં સ્થાને સ્થાને વને વને ।
દ્રષ્ટવ્યો નિધિરેવાસૌ મહાકીર્તિપ્રતાપયોઃ ॥ ૮૭॥

રામેણ સહિતઃ ક્રીડાં બહ્વીં વિસ્તારયિષ્યતિ । var બાહ્વીં
રામસ્ય કૃત્વા સાહાય્યં પ્રણયં ચાર્ચયિષ્યતિ ॥ ૮૮॥

ઇતિ શ્રીમદાદિરામાયણે બ્રહ્મભુશુણ્ડસંવાદે
લક્ષ્મણસહસ્રનામકથનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*lakShmaNasahasranAmastotram from bhuShuNDirAmAya*

pdf was typeset on June 2, 2019

Please send corrections to *sanskrit@cheerful.com*